श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री दशरथ कृतं

# ॥ श्री सरय्वष्टकम् (सरयू - अष्टकम्) ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सरय्वष्टकम् (सरयू - अष्टकम्) ॥

दशरथ उवाच

नमस्ते सरयूदेवि वसिष्ठतनये शुभे।
ब्रह्मादिसकलैर्देवैर्ऋषिभिर्नारदादिभिः ॥ 1 ॥

सदा त्वं सेविता देवि तथा सुकृतिभिर्नरैः।
मानसाच्च समायाते जगतां पापहारिणि ॥ 2 ॥

स्मरतां पश्यतां देवि पापनाशे पटीयसि।
ये पिबन्ति जलं देवि त्वदीयं गतमत्सराः ॥ 3 ॥

स्तनपानं न ते मातुः करिष्यन्ति कदाचन।
मनुप्रभृतिभिर्मान्यैर्मानितासि सदा शुभे ॥ 4 ॥

त्वत्तीरमरणेनैव त्वन्नामरटनेन च।
ये त्यजन्ति तनुं देवि ते कृतार्था न संशयः ॥ 5 ॥

त्वं तु नेत्रोद्भवा देवि हरेर्नारायणस्य हि।
महिमा तव देवैश्च गीयते च मुहुर्मुहुः ॥ 6 ॥

तत्र का हि मनश्शक्तिः स्तवने मानुषस्य च।
त्वत्तीरे सर्वतीर्थानि निवसन्ति चतुर्युगे ॥ 7 ॥

नमो देवि नमो देवि पुनरेव नमो नमः।
हे वासिष्ठि महाभागे प्रणतं रक्ष बन्धनात् ॥ 8 ॥

श्रीसरयू उवाच
त्वया कृतमिदं यस्तु ह्यष्टकं च पठेन्मम।
स्नानस्य सर्वतीर्थानां फलमाप्नोति मानवः॥ 9॥

॥ इति श्री सरय्वष्टकं समाप्तम्॥